# कक्षा : दशमी
## संस्कृतम् (122)
## आदर्श-प्रश्न-पत्रम् - 2018-19

**समयः – होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः -**

- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 10 पृष्ठानि मुद्रितानि सन्ति ।
- कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 16 प्रश्नाः सन्ति ।
- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति । अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम् ।

**प्रश्नपत्रस्वरूपम् -**

| | | | |
|---|---|---|---|
| खण्ड : क | : | अपठितांश – अवबोधनम् | 10 अङ्काः |
| खण्डः - ख | : | रचनात्मककार्यम् | 15 अङ्काः |
| खण्ड : ग | : | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| खण्ड : घ | : | पठित-अवबोधनम् | 30 अङ्काः |

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।



CBSE Solved Sample Papers are Availalbe by whatsapp also from whatsapp No +91 89056 29969

| | | |
|---|---|---|
| | **खण्डः - क** 10 अङ्काः<br>**अपठितांश – अवबोधनम्** | |
| **1.** | 1. **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br><br>एकदा द्वौ धनिकौ आस्ताम् । तयोः धनिकयोः मध्ये विवाद: जात:। उभौ अपि न्यायालयं गतवन्तौ। एक: धनिक: अचिन्तयत् - अहं लक्षं रूप्यकाणि न्यायाधीशाय उत्कोचरूपेण ददामि इति। स: स्यूते लक्षं रूप्यकाणि स्थापयित्वा न्यायाधीशस्य गृहं गतवान्। न्यायाधीश: तस्य मन्तव्यं ज्ञात्वा क्रुद्ध: अभवत्। धनिक: न्यायाधीशम् अवदत्- भो: ! मत्सदृशा: लक्षरूप्यकाणां दातार: दुर्लभा: एव। न्यायाधीश: धनिकम् अवदत्- लक्ष-लक्षरूप्यकाणां दातार: कदाचित् अन्ये अपि भवेयु: परन्तु लक्षरूप्यकाणां निराकर्त्तार: मत्सदृशा: अन्ये विरला: एव। अत: कृपया गच्छतु। न्यायस्थानं मलिनं मा करोतु। लज्जित: धनिक: धनस्यूतं गृहीत्वा तत: निर्गतः। | |
| | **अ एकपदेन उत्तरत – (केवलं प्रश्नचतुष्टयम्)**<br>(i) कयोः मध्ये विवाद: जातः?<br>(ii) क: लज्जित: भूत्वा निर्गत:?<br>(iii) उभौ कुत्र गतवन्तौ?<br>(iv) धनिक: कति रूप्यकाणि न्यायाधीशाय दातुम् इच्छति स्म?<br>(v) लज्जितः धनिकः किं गृहीत्वा निर्गतः? | ½×4=2 |
| | **ब पूर्णवाक्येन लिखत - (केवलं प्रश्नद्वयम्)**<br>(i) धनिक: न्यायाधीशं किम् अवदत्?<br>(ii) न्यायाधीश: किम् अवदत्?<br>(iii) एकः धनिकः किम् अचिन्तयत्? | 1×2=2 |
| | **स यथानिर्देशम् उत्तरत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) 'एकदा द्वौ धनिकौ आस्ताम्' अत्र किं क्रियापदम्?<br>(क) एकदा (ख) धनिकौ (ग) आस्ताम्<br>(ii) 'लज्जित:' इति विशेषणपदस्य विशेष्यपदं किम् ?<br>(क) न्यायाधीशः (ख) धनिकः (ग) दातारः<br>(iii) 'निर्धनः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?<br>(क) न्यायाधीशः (ख) धनिकः (ग) विवादः<br>(iv) 'अहं लक्षं रूप्यकाणि.....ददामि' अस्मिन् वाक्ये 'अहम्' इति पदं कस्मै प्रयुक्तम्?<br>(क) धनिकाय (ख) न्यायाधीशाय (ग) न्यायालयाय | 1×4=4 |



Download All Solved Sample Papers from website www.cbse.online

| | | |
|---|---|---|
| | (v) 'शान्तः' इति पदस्य विलोमपदं चित्वा लिखत ।<br>(क) लज्जितः (ख) क्रुद्धः (ग) धनिकः<br>**द अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत -** | 2 |
| | | |
| | **खण्डः - ख** 15 अङ्काः<br>**रचनात्मककार्यम्** | |
| **2.** | **भवत्याः नाम अदितिः अस्ति। भवत्या: विद्यालये पर्यावरणदिवसः परिपालितः। एतद्-विषये स्वसखीं प्रेरणां प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुन: उत्तरपुस्तिकायां लिखतु ।**<br><br>परीक्षाभवनात्<br>दिनाङ्कः --------<br><br>प्रिये (i) --------<br>(ii) ------- नमस्ते।<br>ह्य: एव मम विद्यालये (iii) ---------------- मानित:। सर्वे छात्रा: (iv) ------------- आसन्। छात्रा: अध्यापकै: सह पादपानाम् (v) ----------- व्यस्ता: आसन्। मम विद्यालयस्य परिसरे तु (vi) ----------- प्रसृतः। एकादश-द्वादशकक्षाया: छात्रा: विद्यालयात् बहि: गत्वा (vii) ----------------- उभयत: पादपान् (viii)------------। सर्वे जनाः अस्माकं विद्यालयस्य छात्राणां प्रयासस्य (ix) --------- कृतवन्तः। यदि सर्वे विद्यालया: एवं कुर्यु: तर्हि (x) -------- रक्षणं स्यात्।<br><br>भवदीया अभिन्ना सखी<br>अदितिः ।<br><br>**मञ्जूषा –**<br>हरितिमा,उत्साहिता, प्रशंसाम्, आरोपितवन्त:, प्रेरणे, मार्गम्, आरोपणे, सस्नेहम्, पर्यावरणदिवसः, वातावरणस्य । | ½x10=5 |
| | | |
| **3.** | **अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत -**<br><br>**मञ्जूषा -**<br>बालिकाः, शिक्षिका, व्यजनानि, वातानुकूलनयन्त्रम्, आसन्दाः, उत्पीठिका, तिष्ठन्ति, ध्यानेन श्रृण्वन्ति , विद्युत्-फलकम् (स्मार्टबोर्ड), महापुरुषाणां चित्राणि, अग्निशमनयन्त्रम् , भित्तौ ,कक्षा। | 2x5=10 |



CBSE Solved Sample Papers are Availalbe by whatsapp also from whatsapp No +91 89056 29969



| | | |
|---|---|---|
| | अथवा<br>मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -<br>"वृक्षाणां महत्त्वम्"<br>मञ्जूषा –<br>प्रकृतेः शोभा, पर्यावरणस्य, रक्षकाः, यच्छन्ति, प्राणवायुम्, औषधम्, काष्ठम्, फलानि, पुष्पाणि, मेघवर्षणे, सहायकाः, छायाम्, विहगानाम्, आश्रयस्थलम् । | 2x5=10 |
| | | |
| | **खण्ड : ग**<br>**अनुप्रयुक्तव्याकरणम्** (25 अङ्काः) | |
| | | |
| 4. | अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत - (केवलं प्रश्नचतुष्टयम्)<br>(i) सः तु स्वपरिवारस्य <u>नयनम्</u> अस्ति ।<br>(ii) युधिष्ठिरः वने <u>पिपासा</u> + <u>आकुलः</u> अभवत् ।<br>(iii) एकम् <u>अनुच्छेदं</u> लिखत ।<br>(iv) आलस्यं हि मनुष्याणां <u>शरीरस्थः</u> + <u>महान्</u> रिपुः अस्ति ।<br>(v) सर्वथा <u>जागरूको + अहं</u> छात्राणां कृते आदर्शः एव । | 1×4=4 |
| | | |
| 5. | अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत –<br>(केवलं प्रश्नचतुष्टयम्) | 1×4=4 |



Download All Solved Sample Papers from website www.cbse.online

(i) रामः च लक्ष्मणः च विश्वामित्रस्य शिष्यौ आस्ताम् ।

(क) रामलक्ष्मणाः (ख) रामलक्ष्मणौ (ग) रामलक्ष्मणे

(ii) सङ्कटापन्नं बालकं माता रक्षति ।

(क) सङ्कटा पन्नम् आपन्नम् (ख) सङ्कटाम् आपन्नम् (ग) सङ्कटम्

(iii) निर्जलं इदं क्षेत्रम् ।

(क) जलस्य योग्यम् (ख) जलस्य अभावः (ग) जलं प्रति

(iv) न विवेकः परमापदां पदम् ।

(क) अविवेकः (ख) नविवेकः (ग) अनविवेकः

(v) नीलगगनं शोभते ।

(क) नीलं गगनम् (ख) नील गगनम् (ग) नीलस्य गगनम्

**6.** **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)** 1×4=4

(i) त्वया पाठः स्मर्तव्यः ।

(क) स्मृ + तव्यः (ख) स्मृ + तव्यत् (ग) स्मर् + तव्यः

(ii) शक्ति + मतुप् जनः रक्षति सर्वम् ।

(क) शक्तिवान् (ख) शक्तिमानः (ग) शक्तिमान्

(iii) कर्मशीलः योगी कथ्यते ।

(क) योगि + इनि (ख) योग + मतुप् (ग) योग + इनि

(iv) पूजनेन प्रसन्न + टाप् लक्ष्मीः कृपां करिष्यति ।

(क) प्रसन्ना (ख) प्रसन्नम् (ग) प्रसन्नः

(v) धनस्य महत्त्वं सर्वे जानन्ति ।

(क) महा + त्वम् (ख) मह + त्व (ग) महत् + त्व

**7.** **मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत -** 1×3=3

रामः – श्याम ! अद्य विद्यालये चेन्नईतः छात्राः आगच्छन्ति ।

श्यामः – मित्र ! छात्रैः चेन्नईतः किमर्थम् (१) ---------? ते इदानीं कुत्र तिष्ठन्ति ?

रामः – मित्र ! ते प्रतियोगितायै अत्र आगताः । इदानीं (२) ---------- छात्रावासे स्थीयते ।

श्यामः – किं ते संस्कृतम् अपि जानन्ति ?

रामः – आम् ! (३) तैः ----------- ज्ञायते । ते संस्कृतं भाषन्ते अपि ।



CBSE Solved Sample Papers are Availalbe by whatsapp also from whatsapp No +91 89056 29969

| | | |
|---|---|---|
| | **मञ्जूषा-** संस्कृतम्, आगम्यते, तैः । <br> **अथवा** <br> **अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत –** <br> (क) बालकः ग्रामं गच्छति । <br> (ख) अर्केण लेखौ लिख्येते । <br> (ग) युवकाः चित्राणि पश्यन्ति । | |
| | | |
| 8. | **कालबोधकशब्दैः अधोलिखित-दिनचर्यायां वा पूरयत - (केवलं प्रश्नचतुष्टयम्)** <br> (क) अहं प्रातःकाले <u>5:30</u> वादने ----------------------- जागरणं करोमि । <br> (ख) अहं <u>6:15</u> वादने ----------------------- व्यायामं करोमि । <br> (ग) अहं <u>7:45</u> वादने ----------------------- विद्यालयं गच्छामि । <br> (घ) <u>2:00</u> वादने ----------------------- विद्यालयस्य अवकाशः भवति । <br> (ङ) रात्रौ <u>8:30</u> वादने ----------------------- अहं भोजनं करोमि । | ½×4=2 |
| | | |
| 9. | **मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)** <br> (क) अहं ---------- अत्र वृष्टेः अभिनन्दनं करोमि । <br> (ख) यदा दुष्टबुद्धिः कलशस्य आवरणम् अपसारयति -------- भयङ्करं विषधरं पश्यति । <br> (ग) सूपकाराणां मेषेण सह एषः कलहः ------ भवतां विनाशकारणं भविष्यति । <br> (घ) ------- वारणावते त्वमेव पाण्डवान् रक्षितवान् । <br> (ङ) -------------- कोलाहलं करोति । <br> **मञ्जूषा –** किमर्थम्, नूनम्, तदा, पुरा, एव | 1×4=4 |
| | | |
| 10. | **अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। अशुद्धं पदं संशोध्य पुनः लिखत – (केवलं प्रश्नचतुष्टयम्)** <br> (क) सः बालकः <u>खादामि</u> । <br> (ख) किं त्वं <u>ह्यः</u> आगमिष्यसि ? <br> (ग) <u>सः</u> उद्यानं विशालम् अस्ति । <br> (घ) <u>अहं</u> अद्य विद्यालयं न गमिष्यामः। <br> (ङ) छात्रः ग्रामं <u>गच्छन्ति</u> । | 1×4=4 |
| | | |



Download All Solved Sample Papers from website www.cbse.online

| | | |
|---|---|---|
| | **खण्डः - घ** **30 अङ्काः**<br>**पठित-अवबोधनम्** | |
| **11.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>अथ कदाचित् दानशालासु विचरन् सः राजा बहुधनलाभेन सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत् –"मम अर्थिनस्तु धनलाभमात्रेण सन्तोषं भजन्ते । नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते ।" एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम् । | 6 |
| | **अ. एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)**<br>(क) राज्ञः निरासक्तिः केषु अभवत् ?<br>(ख) राजा कुत्र विचरन् आसीत् ?<br>(ग) अर्थिनः केन सन्तुष्टाः आसन् ? | 1×2=2 |
| | **ब. पूर्णवाक्येन उत्तरत । (केवलम् प्रश्नमेकम्)**<br>(क) राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय किं सञ्जातम् ?<br>(ख) अर्थिनां विरलसंख्यां विलोक्य राजा किम् अचिन्तयत् ? | 2×1=2 |
| | **स. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) 'मम अर्थिनस्तु धनलाभमात्रेण सन्तोषं भजन्ते' अत्र 'मम' पदं कस्मै प्रयुक्तम्?<br>(क) याचकेभ्यः (ख) राज्ञे (ग) दानशालायै<br>(ii) 'अचिन्तयत्' इति पदस्य कर्तृपदं किम्?<br>(क) दानवीराः (ख) याचकः (ग) राजा<br>(iii) 'अर्थिनाम्' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम्?<br>(क) याचकानाम् (ख) सन्तुष्टानाम् (ग) विरलसंख्याम्<br>(iv) 'याचकाः' इति पदस्य किं क्रियापदं गद्यांशे प्रयुक्तम्?<br>(क) याचन्ते (ख) अचिन्तयत् (ग) भजन्ते<br>(v) `विज्ञाय' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत ।<br>(क) सन्तोषम् (ख) ज्ञात्वा (ग) सकलम् | ½×4=2 |
| **12.** | **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>**चञ्चलं हि मन: कृष्ण ! प्रमाथि बलवद्दृढम् ।**<br>**तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥** | 6 |



CBSE Solved Sample Papers are Availalbe by whatsapp also from whatsapp No +91 89056 29969

| | | |
|---|---|---|
| | **अ. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) मनस: निग्रह: कस्य इव दुष्कर:?<br>(ii) चञ्चलं किम् अस्ति?<br>(iii) अर्जुनः कं सम्बोधयति?<br>**ब. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नमेकम्)**<br>(क) अस्मिन् श्लोके अर्जुन: कं सम्बोधयति ?<br>(ख) मनसः निग्रहं कः सुदुष्करं मन्यते?<br>**स. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) "तस्य" इति सर्वनामपदम् कस्मै प्रयुक्तम्?<br>(अ) कृष्ण: (ब) अर्जुनाय (स) मनसे<br>(ii) "अहम्" इति कर्तृपदस्य क्रियापदं किम् ?<br>(अ) प्रमाथि (ब) मन्ये (स) सुदुष्करम्<br>(iii) "चञ्चलं मन:" अनयो: पदयो: किं विशेष्यपदम्?<br>(अ) चञ्चलम् (ब) मन: (स) चञ्चलं मन:<br>(iv) "अतिकठिनम् " इत्यस्य पदस्य क: पर्याय: श्लोके प्रयुक्तम् ?<br>(अ) चञ्चलम् (ब) निग्रहम् (स) सुदुष्करम्<br>(v) "प्रमाथि मनः" अत्र किं विशेषणपदम्?<br>(अ) प्रमाथि (ब) मनः (स) प्रमाथि मनः | 1x2=2<br><br>2x1=2<br><br>½x4=2 |
| | | |
| **13.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**<br>(ततः पुत्रशोकसन्तप्ताः युधिष्ठिरः भीमः द्रौपदी च रणभूमौ प्रविशन्ति )<br>द्रौपदी - (दीर्घं निःश्वस्य) हा हन्त ! किम् इदं घोरम् आपतितम् ?<br>पापकर्मणा द्रौणिना मे पुत्राः भ्रातरः च हताः। अग्निः इव दहति माम् अयं शोकः ।<br>युधिष्ठिरः - शुभे ! धैर्यं धारय। नूनं तव पुत्राः वीरगतिम् एव प्राप्ता। वीरजननी त्वं शोचितुं न अर्हसि ।<br>द्रौपदी – कथं मन्दभाग्या अहं धैर्यं धारयामि । यावत् असौ क्रूरकर्मा न दण्ड्यते, तावत् अहम् इतः न गमिष्यामि , अत्रैव च प्राणत्यागं च करिष्यामि ।<br>युधिष्ठिरः - प्रिये ! मा एवं ब्रूयाः। सः पापकर्मा कुत्र गतः, इति न जानीमः। अतिदूरं किञ्चिद् दुर्गमवनं प्रविष्टः भवेत्। | 6 |



Download All Solved Sample Papers from website www.cbse.online

| | | |
|---|---|---|
| | **अ. एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)**<br>(क) केन द्रौपद्याः पुत्राः भ्रातरः च हताः?<br>(ख) द्रौणिः कीदृशः आसीत् ?<br>(ग) 'अत्रैव च प्राणत्यागं च करिष्यामि' इति का वदति?<br>**ब. पूर्णवाक्येन उत्तरत । (केवलं प्रश्नमेकम्)**<br>(क) पुत्रशोकसन्तप्ताः के आसन् ?<br>(ख) का शोचितुं न अर्हति?<br>**स. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत -**<br>(i) नाट्यांशे 'दहति' इति क्रियायाः कर्तृपदं किम् ?<br>(क) इव (ख) माम् (ग) शोकः<br>(ii) 'मन्दभाग्या अहं धैर्यं धारयामि?' अस्मिन् वाक्ये 'अहम्' इति पदं कस्मै प्रयुक्तम्?<br>(क) युधिष्ठिराय (ख) द्रौपद्यै (ग) भीमाय<br>(iii) 'सः पापकर्मा कुत्र गतः' इत्यत्र 'सः' इति विशेषणपदस्य विशेष्यं पदं किम्?<br>(क) पापकर्मा (ख) सः (ग) कुत्र<br>(iv) नाट्यांशे 'धीरताम्' इत्यर्थे किं पदं प्रयुक्तम्?<br>(क) घोरम् (ख) धैर्यम् (ग) आपतितम्<br>(v) 'दहति' इति क्रियापदस्य कर्तृपदं गद्यांशात् चित्वा लिखत ।<br>(क) शोकः (ख) अग्निः (ग) माम् | 1×2=2<br><br>2×1=2<br><br>½×4=2 |
| | | |
| **14.** | **रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)**<br>(क) **रामेण** विचित्रः स्वप्नः दृष्टः ।<br>(ख) पाठकस्य **षट्** गुणाः सन्ति ।<br>(ग) **दानशालासु** विचरन् राजा अचिन्तयत्।<br>(घ) जनकेन सुताय **शैशवे** विद्याधनं दीयते ।<br>(ङ) सूर्यं विना **कालस्य** गणना न सम्भवति | 1×4=4 |
| | | |
| **15.** | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकयोः अन्वयं पूरयत –**<br>I. **अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।**<br>**व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥**<br>**अन्वयः**- हे (i) ----------! तव अयं कोशः कः अपि (ii) -------------- विद्यते ।<br>व्ययतः (iii)-------------- याति (iv) ------------ च क्षयम् आयाति । | ½ ×4=2 |



CBSE Solved Sample Papers are Availalbe by whatsapp also from whatsapp No +91 89056 29969

| | | |
|---|---|---|
| | **II. अधुना रमणीया हि सृष्टिरेषा जगत्पतेः ।**<br>**जीवाः सर्वेऽत्र मोदन्तां भावयन्तः परस्परम् ॥**<br><br>**अन्वयः–** जगत्पतेः(i) ................. सृष्टिः हि (ii) .................. **रमणीया** ।<br>सर्वे जीवाः(iii) ............... **परस्परं भावयन्तः** (iv)................ ।<br>**मञ्जूषा-**<br>एषा, वृद्धिम्, अधुना, अपूर्वः, भारति, अत्र, सञ्चयात्, मोदन्ताम् | ½ ×4=2 |
| | | |
| **16.** | **अधोलिखितानां कथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्)**<br>1. भवतः दानवीरताम् **आकर्ण्य** आगतोऽस्मि ।<br>(क) श्रुत्वा (ख) दृष्ट्वा (ग) अवगम्य<br>2. तस्मात् संहर **दिव्यं** त्वम् अस्त्रम् ।<br>(क) गृहाण (ख) अलौकिकम् (ग) रोधय<br>3. **साधुवृत्तिं** समाचरेत् ।<br>(क) वेशम् (ख) भिक्षाटनम् (ग) सदाचरणम्<br>4. आचार्यात् **पादम्** आदत्ते ।<br>(क) श्लोकस्य पंक्तिम् (ख) चतुर्थांशम् (ग) शिक्षकात्<br>5. **हेयम्** अपि च किम्?<br>(क) नेयम् (ख) त्याज्यम् (ग) गेयम् | 1×4=4 |

- ∘ O ∘ -



Download All Solved Sample Papers from website www.cbse.online

# कक्षा : दशमी
## संस्कृतम् (कोड संख्या -122)
## अङ्कयोजना - 2018-19

**समयः – होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**अवधातव्यम् -**

1. अस्याम् अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति । प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति ।
2. अनुच्छेदे श्लोके वा आधारिताः प्रश्नाः अवबोधात्मकाः सन्ति । अतः विद्यार्थिनः अनुच्छेदे प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाची-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति । तदर्थम् अङ्काः देयाः । यदि विद्यार्थिनः उत्तरदान-समये समुचितानां विभक्तीनां वचनानां प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः ।
3. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः ।
4. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः ।
5. 'ख' खण्डे (रचनात्मक-कार्ये) वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम् । अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः ।
6. **यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः दातुं शक्यन्ते तादृशानां प्रश्नानां मूल्याङ्कनं करणीयम् । यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम् ।**
7. **प्रश्ननिर्माणस्य प्रश्ने ½ अङ्कः वाक्यलेखनाय अस्ति, ½ अङ्कश्च प्रश्नवाचकचिह्नाय। परं सम्यक्-प्रश्ननिर्माणं तदा एव प्रश्नवाचकचिह्नस्य कृते अङ्काः प्रदेयाः।)**

| प्रश्नसङ्ख्या | खण्डः | अङ्काः |
|---|---|---|
| | **'क' खण्डः**<br>**अपठित-अवबोधनम्** | 10 **अङ्काः** |
| 1. | **अ एकपदेन उत्तरत –**<br>(i) धनिकयोः<br>(ii) धनिकः<br>(iii) न्यायालयम्<br>(iv) लक्षं रूप्यकाणि / लक्षरूप्यकाणि | ½×4=2 |



CBSE Solved Sample Papers are Availalbe by whatsapp also from whatsapp No +91 89056 29969

| | | |
|---|---|---|
| | (v) धनस्यूतम्<br>**ब पूर्णवाक्येन लिखत**<br>(i) धनिक: न्यायाधीशम् अवदत्- भो: ! मत्सदृशा: लक्षरूप्यकाणां दातार: दुर्लभा: एव।<br>(ii) न्यायाधीश: धनिकम् अवदत्- लक्ष-लक्षरूप्यकाणां दातार: कदाचित् अन्ये अपि भवेयु: परन्तु लक्षरूप्यकाणां निराकर्त्तार: मत्सदृशा: अन्ये विरला: एव। अत: कृपया गच्छतु। न्यायस्थानं मलिनं मा करोतु।<br>(iii) एकः धनिकः अचिन्तयत् –अहं लक्षं रूप्यकाणि न्यायाधीशाय उत्कोचरूपेण ददामि इति । | 1x2 = 2 |
| | **स यथानिर्देशम् उत्तरत**<br>(i) (ग) आस्ताम्<br>(ii) (ख) धनिकः<br>(iii) (ख) धनिकः<br>(iv) (क) धनिकाय<br>(v) (ख) क्रुद्धः | 1×4=4 |
| | **द अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत**<br>न्यायाधीशः / प्रामाणिक-न्यायाधीशः अथवा अन्यः अपि कश्चित् उपयुक्तशीर्षकः भवितुम् अर्हति । | 2 |
| | | |
| | **'ख' खण्डः**<br>**रचनात्मक-कार्यम्** | **15 अङ्काः** |
| | | |
| 2. | 2. **पत्र-लेखनम्**<br>(i) प्रेरणे (ii) सस्नेहम्<br>(iii) पर्यावरणदिवसः (iv) उत्साहिताः<br>(v) आरोपणे (vi) हरीतिमा<br>(vii) मार्गम् (viii) आरोपितवन्तः<br>(ix) प्रशंसाम् (x) वातावरणस्य | ½x10 =5 |
| | | |
| 3. | **चित्रवर्णनम्**<br>अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते । केवलं वाक्यशुद्धिः द्रष्टव्या । | 2×5=10 |



Download All Solved Sample Papers from website www.cbse.online

| | | |
|---|---|---|
| | अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना अस्ति । वाक्यं दीर्घम् अस्ति अथवा लघुः इति महत्त्वपूर्णं नास्ति । प्रतिवाक्यम् एकः अङ्कः भावस्य कृते एकः अङ्कः च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारितः अस्ति। मञ्जूषायां प्रदत्ताः शब्दाः सहायतार्थं सन्ति । छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति । छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति । मञ्जूषायां प्रदत्तानां शब्दानां विभक्ति-परिवृत्य अपि वाक्यनिर्माणं शक्यते ।<br><br>**अथवा**<br>**अनुच्छेदलेखनम्**<br>अयं विकल्पः सर्वेभ्यः अस्ति । छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्ति-परिवृत्य अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति । अतः अङ्काः देयाः। अस्मै प्रश्नाय अपि १० अङ्काः निर्धारिताः सन्ति । प्रत्येकं वाक्यनिमित्तम् अङ्कद्वयम् इति। | |
| | | |
| | **'ग' खण्डः**<br>**अनुप्रयुक्त-व्याकरणम्** | 25 अङ्काः |
| | | |
| 4. | **सन्धि / सन्धिच्छेदः**<br>(i) <u>ने</u> + <u>अनम्</u><br>(ii) पिपासाकुलः<br>(iii) <u>अनु</u> + <u>छेदम्</u><br>(iv) शरीरस्थो महान्<br>(v) जागरूकोऽहम्<br>**(पूर्णतया अङ्काः न न्यूनीकरणीयाः, अंशतः अङ्काः देयाः।)** | 1×4=4 |
| | | |
| 5. | **समासः / विग्रहः**<br>(i) (ख) रामलक्ष्मणौ<br>(ii) (ग) सङ्कटम् आपन्नम्<br>(iii) (ख) जलस्य अभावः<br>(iv) (क) अविवेकः<br>(v) (क) नीलं गगनम्<br>**(अस्मिन् प्रश्ने यदि छात्राः केवलम् उत्तराणि लिखन्ति तदा अपि पूर्णाः अङ्काः देयाः।)** | 1x4 = 4 |
| | | |



CBSE Solved Sample Papers are Availalbe by whatsapp also from whatsapp No +91 89056 29969

| | | |
|---|---|---|
| 6. | प्रकृति-प्रत्ययः<br>(i) (ख) स्मृ + तव्यत्<br>(ii) (ग) शक्तिमान्<br>(iii) (ग) योग + इनि<br>(iv) (क) प्रसन्ना<br>(v) (ग) महत् + त्व<br>(अस्मिन् प्रश्ने यदि छात्राः केवलम् उत्तराणि लिखन्ति तदा अपि पूर्णाः अङ्काः देयाः।) | 1×4=4 |
| | | |
| 7. | वाच्यपरिवर्तन –<br>(i) आगम्यते<br>(ii) तैः<br>(iii) संस्कृतम्<br>(अस्मिन् प्रश्ने यदि छात्राः केवलम् उत्तराणि लिखन्ति तदा अपि पूर्णाः अङ्काः देयाः।)<br>अथवा<br>(क) बालकेन ग्रामः गम्यते ।<br>(ख) अर्कः लेखौ लिखति ।<br>(ग) युवकैः चित्राणि दृश्यन्ते । | 1×3=3 |
| | | |
| 8. | समयः -<br>(क) सार्ध-पञ्चवादने<br>(ख) सपाद-षड्वादने<br>(ग) पादोन-अष्टवादने<br>(घ) द्विवादने<br>(ङ) सार्ध-अष्टवादने | ½×4=2 |
| | | |
| 9. | अव्ययानि-<br>(क) एव<br>(ख) तदा<br>(ग) नूनम्<br>(घ) पुरा<br>(ङ) किमर्थम् | 1x4 =4 |
| | | |
| | | |



Download All Solved Sample Papers from website www.cbse.online

| | | |
|---|---|---|
| 10. | **अशुद्धि-संशोधनम् -**<br>(क) खादति<br>(ख) श्वः<br>(ग) तत्<br>(घ) वयम्<br>(ङ) गच्छति | 1×4=4 |
| | | |
| | **'घ' खण्डः**<br>**पठित-अवबोधनम्** | 30 अङ्काः |
| | | |
| 11. | **गद्यांशः**<br>**अ. एकपदेन उत्तरत ।**<br>(क) स्व-गात्रेषु / गात्रेषु<br>(ख) दानशालासु<br>(ग) बहुधनलाभेन<br><br>**ब. पूर्णवाक्येन उत्तरत -**<br>(क) राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम् ।<br>(ख) अर्थिनां विरलसंख्यां विलोक्य राजा अचिन्तयत् –"मम अर्थिनस्तु धनलाभमात्रेण सन्तोषं भजन्ते । नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य अङ्गानि अपि याचन्ते "।<br><br>**स. भाषिककार्यम् -**<br>(i) (ख) राज्ञे<br>(ii) (ग) राजा<br>(iii) (क) याचकानाम्<br>(iv) (क) याचन्ते<br>(v) (ख) ज्ञात्वा | 1×2=2<br><br><br><br><br>2×1=2<br><br><br><br><br>½×4=2 |
| | | |
| 12. | **पद्यांशः**<br>**अ. एकपदेन उत्तरत -**<br>(i) वायोः / वायोरिव<br>(ii) मनः | 1x2 =2 |



CBSE Solved Sample Papers are Availalbe by whatsapp also from whatsapp No +91 89056 29969

| | | |
|---|---|---|
| | (iii) कृष्णम्<br><br>**ब. पूर्णवाक्येन उत्तरत -**<br>(क) अस्मिन् श्लोके अर्जुनः कृष्णं सम्बोधयति ।<br>(ख) मनसः निग्रहं अर्जुनः सुदुष्करं मन्यते।<br><br>**स. निर्देशानुसारम् उत्तरत -**<br>(i) (स) मनसे<br>(ii) (ब) मन्ये<br>(iii) (ब) मनः<br>(iv) (स) सुदुष्करम्<br>(v) (अ) प्रमाथि | 2x1=2<br><br>½x4=2 |
| | | |
| 13. | **नाट्यांशः**<br>**अ. एकपदेन उत्तरत ।**<br>(क) द्रौणिना / द्रौणपुत्रेण / अश्वत्थाम्ना<br>(ख) पापकर्मा / पापी<br>(ग) द्रौपदी<br>**ब. पूर्णवाक्येन उत्तरत ।**<br>(क) युधिष्ठिरः, भीमः द्रौपदी च पुत्रसन्तप्ताः आसन् ।<br>(ख) वीरजननी/द्रौपदी शोचितुं न अर्हति।<br><br>**स. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत -**<br>(i) (ग) शोकः<br>(ii) (ख) द्रौपद्यै<br>(iii) (क) पापकर्मा<br>(iv) (ख) धैर्यम्<br>(v) (ख) अग्निः | 1x2 = 2<br><br>2×1=2<br><br>½×4=2 |
| | | |
| 14. | **प्रश्ननिर्माणम् । (½ अङ्कः वाक्यलेखनाय अस्ति, ½ अङ्कश्च प्रश्नवाचकचिह्नाय ।**<br>**(परं सम्यक्-प्रश्ननिर्माणं भवति <u>तदा एव प्रश्नवाचकचिह्नस्य कृते अङ्काः प्रदेयाः</u>)**<br>(क) केन<br>(ख) कति<br>(ग) कुत्र / कासु | 1×4=4 |



Download All Solved Sample Papers from website www.cbse.online

| | | |
|---|---|---|
| | (घ) कदा / कस्मिन्<br>(ङ) कस्य | |
| 15. | **मञ्जूषातः समुचितपदानि चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत -**<br>I. **अन्वयः-** (i) भारति (ii) अपूर्वः<br>(iii) वृद्धिम् (iv) सञ्चयात्<br>II. **अन्वयः** – (i) एषा (ii) अधुना<br>(iii) अत्र (iv) मोदन्ताम्<br>III. **अन्वय:** - (i) क्रमश: (ii) विद्यानाम्<br>(iii) धनस्य (iv) हेतु: | ½ ×4=2<br>½ ×4=2 |
| 16. | **अधोलिखितानां कथनानां समुचितं भावं विकल्पेभ्यः चित्वा लिखत –**<br>1. (क) श्रुत्वा<br>2. (ख) अलौकिकम्<br>3. (ग) सदाचरणम्<br>4. (ख) चतुर्थांशम्<br>5. (ख) त्याज्यम् | 1×4=4 |

--000--------0000------------------000000------------------0000------000--



CBSE Solved Sample Papers are Availalbe by whatsapp also from whatsapp No +91 89056 29969